Assistant Professor (College Edu. Deptt.) Exam-2025

Exam Date :- 12-12-2025

| | | |
|---|---|---|
| पुस्तिका में पृष्ठों की संख्या | : | 16 |
| Number of Pages in Booklet | : | 16 |
| पुस्तिका में प्रश्नों की संख्या | : | 150 |
| No. of Questions in Booklet | : | 150 |

**CAP-25**

**इस प्रश्न-पुस्तिका को तब तक न खोलें जब तक कहा न जाए । Do not open this Question Booklet until you are asked to do so.**

**907225**

**प्रश्न–पुस्तिका संख्या व बारकोड / Question Booklet No. & Barcode**

**Paper Code : 15**

**Paper – I**
**Sub : Sanskrit-I**

**समय : 03:00 घण्टे + 10 मिनट अतिरिक्त***
**Time : 03:00 Hours + 10 Minutes Extra***

**अधिकतम अंक : 75**
**Maximum Marks : 75**

**प्रश्न–पुस्तिका के पेपर की सील/पॉलिथीन बैग को खोलने पर प्रश्न-पत्र हल करने से पूर्व परीक्षार्थी यह सुनिश्चित कर लें कि :**
- **प्रश्न–पुस्तिका संख्या तथा ओ.एम.आर. उत्तर–पत्रक पर अंकित बारकोड संख्या समान हैं ।**
- **प्रश्न–पुस्तिका एवं ओ.एम.आर. उत्तर–पत्रक के सभी पृष्ठ व सभी प्रश्न सही मुद्रित हैं । समस्त प्रश्न, जैसा कि ऊपर वर्णित है, उपलब्ध हैं तथा कोई भी पृष्ठ कम नहीं है/ मुद्रण त्रुटि नहीं है ।**

**किसी भी प्रकार की विसंगति या दोषपूर्ण होने पर परीक्षार्थी वीक्षक से दूसरा प्रश्न–पत्र प्राप्त कर लें । यह सुनिश्चित करने की जिम्मेदारी अभ्यर्थी की होगी । परीक्षा प्रारम्भ होने के 5 मिनट पश्चात् ऐसे किसी दावे/आपत्ति पर कोई विचार नहीं किया जायेगा ।**

**On opening the paper seal/polythene bag of the Question Booklet before attempting the question paper, the candidate should ensure that :**
- **Question Booklet Number and Barcode Number of OMR Answer Sheet are same.**
- **All pages & Questions of Question Booklet and OMR Answer Sheet are properly printed. All questions as mentioned above are available and no page is missing/misprinted.**

**If there is any discrepancy/defect, candidate must obtain another Question Booklet from Invigilator. Candidate himself shall be responsible for ensuring this. No claim/objection in this regard will be entertained after five minutes of start of examination.**

## परीक्षार्थियों के लिए निर्देश

1. **प्रत्येक प्रश्न के लिये एक विकल्प भरना अनिवार्य है ।**
2. **सभी** प्रश्नों के अंक समान हैं ।
3. प्रत्येक प्रश्न का मात्र **एक** ही उत्तर दीजिए । एक से अधिक उत्तर देने की दशा में प्रश्न के उत्तर को गलत माना जाएगा ।
4. **OMR** उत्तर-पत्रक इस प्रश्न-पुस्तिका के अन्दर रखा है । जब आपको प्रश्न-पुस्तिका खोलने को कहा जाए, तो उत्तर-पत्रक निकाल कर ध्यान से केवल **नीले बॉल पॉइंट पेन** से विवरण भरें ।
5. कृपया अपना रोल नम्बर ओ.एम.आर. उत्तर-पत्रक पर सावधानीपूर्वक सही भरें । गलत रोल नम्बर भरने पर परीक्षार्थी स्वयं उत्तरदायी होगा ।
6. **ओ.एम.आर. उत्तर-पत्रक में करेक्शन पेन/व्हाईटनर/सफेदा का उपयोग निषिद्ध है ।**
7. **प्रत्येक गलत उत्तर के लिए प्रश्न अंक का 1/3 भाग काटा जायेगा ।** गलत उत्तर से तात्पर्य अशुद्ध उत्तर अथवा किसी भी प्रश्न के एक से अधिक उत्तर से है ।
8. **प्रत्येक प्रश्न के पाँच विकल्प दिये गये हैं, जिन्हें क्रमशः 1, 2, 3, 4, 5 अंकित किया गया है । अभ्यर्थी को सही उत्तर निर्दिष्ट करते हुए उनमें से केवल एक गोले (बबल) को उत्तर-पत्रक पर नीले बॉल पॉइंट पेन से गहरा करना है ।**
9. **यदि आप प्रश्न का उत्तर नहीं देना चाहते हैं तो उत्तर-पत्रक में पांचवें (5) विकल्प को गहरा करें । यदि पांच में से कोई भी गोला गहरा नहीं किया जाता है, तो ऐसे प्रश्न के लिये प्रश्न अंक का 1/3 भाग काटा जायेगा ।**
10. * **प्रश्न-पत्र हल करने के उपरांत अभ्यर्थी अनिवार्य रूप से ओ.एम.आर. उत्तर-पत्रक जाँच लें कि समस्त प्रश्नों के लिये एक विकल्प (गोला) भर दिया गया है । इसके लिये ही निर्धारित समय से 10 मिनट का अतिरिक्त समय दिया गया है ।**
11. **यदि अभ्यर्थी 10% से अधिक प्रश्नों में पांच विकल्पों में से कोई भी विकल्प अंकित नहीं करता है तो उसको अयोग्य माना जायेगा ।**
12. **मोबाइल फोन अथवा अन्य किसी इलेक्ट्रोनिक यंत्र का परीक्षा हॉल में प्रयोग पूर्णतया वर्जित है । यदि किसी अभ्यर्थी के पास ऐसी कोई वर्जित सामग्री मिलती है तो उसके विरुद्ध आयोग द्वारा नियमानुसार कार्यवाही की जायेगी ।**

**चेतावनी :** अगर कोई अभ्यर्थी नकल करते पकड़ा जाता है या उसके पास से कोई अनधिकृत सामग्री पाई जाती है, तो उस अभ्यर्थी के विरुद्ध पुलिस में प्राथमिकी दर्ज कराते हुए **राजस्थान सार्वजनिक परीक्षा (भर्ती में अनुचित साधनों की रोकथाम अध्युपाय) अधिनियम, 2022 तथा अन्य प्रभावी कानून एवं आयोग के नियमों-प्रावधानों** के तहत कार्यवाही की जाएगी । साथ ही आयोग ऐसे अभ्यर्थी को भविष्य में होने वाली आयोग की समस्त परीक्षाओं से विवर्जित कर सकता है ।

## INSTRUCTIONS FOR CANDIDATES

1. **It is mandatory to fill one option for each question.**
2. **All** questions carry equal marks.
3. Only **one** answer is to be given for each question. If more than **one** answers are marked, it would be treated as wrong answer.
4. The **OMR** Answer Sheet is inside this Question Booklet. When you are directed to open the Question Booklet, take out the Answer Sheet and fill in the particulars carefully with **Blue Ball Point Pen** only.
5. Please correctly fill your Roll Number in **OMR** Answer Sheet. Candidates will themselves be responsible for filling wrong Roll No.
6. **Use of Correction Pen/Whitener in the OMR Answer Sheet is strictly forbidden.**
7. **1/3 part of the mark(s) of each question will be deducted for each wrong answer.** A wrong answer means an incorrect answer or more than one answers for any question.
8. **Each question has five options marked as 1, 2, 3, 4, 5. You have to darken only one circle (bubble) indicating the correct answer on the Answer Sheet using BLUE BALL POINT PEN.**
9. **If you are not attempting a question then you have to darken the circle '5'. If none of the five circles is darkened, one third (1/3) part of the marks of question shall be deducted.**
10. * **After solving question paper, candidate must ascertain that he/she has darkened one of the circles (bubbles) for each of the questions. Extra time of 10 minutes beyond scheduled time, is provided for this.**
11. **A candidate who has not darkened any of the five circles in more than 10% questions shall be disqualified.**
12. **Mobile Phone or any other electronic gadget in the examination hall is strictly prohibited. A candidate found with any of such objectionable material with him/her will be strictly dealt with as per rules.**

**Warning :** If a candidate is found copying or if any unauthorized material is found in his/her possession, F.I.R. would be lodged against him/her in the Police Station and he/she would be liable to be prosecuted under **Rajasthan Public Examination (Measures for Prevention of Unfair means in Recruitment) Act, 2022 & any other laws applicable and Commission's Rules-Regulations.** Commission may also debar him/her permanently from all future examinations.

**उत्तर–पत्रक में दो प्रतियाँ हैं – मूल प्रति और कार्बन प्रति। परीक्षा समाप्ति पर परीक्षा कक्ष छोड़ने से पूर्व परीक्षार्थी उत्तर–पत्रक की दोनों प्रतियाँ वीक्षक को सौंपेंगे, परीक्षार्थी स्वयं कार्बन प्रति अलग नहीं करें । वीक्षक उत्तर–पत्रक की मूल प्रति को अपने पास जमा कर, कार्बन प्रति को मूल प्रति से कट लाइन से मोड़ कर सावधानीपूर्वक अलग कर परीक्षार्थी को सौंपेंगे, जिसे परीक्षार्थी अपने साथ ले जायेंगे । परीक्षार्थी को उत्तर–पत्रक की कार्बन प्रति चयन प्रक्रिया पूर्ण होने तक सुरक्षित रखनी होगी एवं आयोग द्वारा माँगे जाने पर प्रस्तुत करनी होगी ।**

1. अधोलिखितेषु अथर्ववेदस्य शाखा नास्ति :
(1) कौथुमीय-शाखा (2) पैप्पलाद-शाखा
(3) शौनकीय-शाखा (4) जाजल-शाखा
(5) अनुत्तरितः प्रश्नः

2. अर्थवादस्य वर्णनं निम्नेषु कुत्र लभ्यते ?
(1) उपनिषद्ग्रन्थे (2) सूत्रग्रन्थे
(3) ब्राह्मणग्रन्थे (4) आरण्यकग्रन्थे
(5) अनुत्तरितः प्रश्नः

3. 'विवाहसूक्तम्' केन वेदेन सम्बद्धम् ?
(1) अथर्ववेदेन (2) सामवेदेन
(3) यजुर्वेदेन (4) ऋग्वेदेन
(5) अनुत्तरितः प्रश्नः

4. 'ऐतरेयब्राह्मणम्' केन वेदेन सम्बद्धम् ?
(1) ऋग्वेदेन (2) सामवेदेन
(3) यजुर्वेदेन (4) अथर्ववेदेन
(5) अनुत्तरितः प्रश्नः

5. प्रौढब्राह्मणग्रन्थः कथ्यते -
(1) शतपथः (2) ऐतरेयः
(3) षड्विंशः (4) ताण्ड्यः
(5) अनुत्तरितः प्रश्नः

6. बृहदारण्यकस्य प्रवचनकर्ता कः ?
(1) महर्षिः याज्ञवल्क्यः (2) जैमिनिः
(3) कठः (4) विश्वामित्रः
(5) अनुत्तरितः प्रश्नः

7. अथर्ववेदस्य उपवेदः नास्ति -
(1) सर्पवेदः (2) असुरवेदः
(3) पुराणवेदः (4) गन्धर्ववेदः
(5) अनुत्तरितः प्रश्नः

8. 'शुनःशेप' इत्याख्यानं कस्य ब्राह्मणस्य अस्ति ?
(1) शतपथब्राह्मणस्य (2) गोपथब्राह्मणस्य
(3) शांखायनब्राह्मणस्य (4) ऐतरेयब्राह्मणस्य
(5) अनुत्तरितः प्रश्नः

9. भूतयज्ञस्य अपरं नाम किम् ?
(1) जातेष्टिः (2) नृयज्ञः
(3) पितृयज्ञः (4) बलिवैश्वदेवः
(5) अनुत्तरितः प्रश्नः

10. समुचितं मेलयत -

| | | | |
|---|---|---|---|
| क. | बुद्धिम् | i. | प्रग्रहम् |
| ख. | इन्द्रियाणि | ii. | सारथिम् |
| ग. | मनः | iii. | गोचरान् |
| घ. | विषयान् | iv. | हयान् |

| | क | ख | ग | घ |
|---|---|---|---|---|
| (1) | ii | i | iii | iv |
| (2) | ii | iv | i | iii |
| (3) | i | ii | iii | iv |
| (4) | ii | iv | iii | i |

(5) अनुत्तरितः प्रश्नः

11. दर्शपौर्णमासे षट्सु विहितकर्मसु नास्ति
(1) उपांशुयागः (2) अग्निषोमीयः
(3) ऐन्द्रम् (4) अतिरात्रः
(5) अनुत्तरितः प्रश्नः

12. 'अरण्याध्ययनादेतद् आरण्यकमितीर्यते' इति केनोक्तम् ?
(1) उव्वटेन (2) वैंकटमाधवेन
(3) सायणेन (4) भट्टभास्करेण
(5) अनुत्तरितः प्रश्नः

13. 'आचार्यदेवो भव' इति वाक्यं कस्याः उपनिषदः वर्तते ?
(1) कठोपनिषदः
(2) तैत्तिरीयोपनिषदः
(3) प्रश्नोपनिषदः
(4) बृहदारण्यकोपनिषदः
(5) अनुत्तरितः प्रश्नः

14. दर्शपौर्णमासयागे प्रयुज्यमानं 'जुहू' पात्रं कस्य वृक्षस्य भवति ?
(1) आम्रस्य (2) पलाशस्य
(3) अश्वत्थस्य (4) खदिरस्य
(5) अनुत्तरितः प्रश्नः

15. "सत्यं ज्ञानमनन्तं ब्रह्म" इति मन्त्रांशः कुत्र वर्तते ?
(1) तैत्तिरीयोपनिषदः शिक्षावल्याम् ।
(2) तैत्तिरीयोपनिषदः ब्रह्मानन्दवल्याम् ।
(3) तैत्तिरीयोपनिषदः भृगुवल्याम् ।
(4) कठोपनिषदः प्रथमवल्याम् ।
(5) अनुत्तरितः प्रश्नः

16. "कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समाः" इति मंत्रांशोल्लेखो वर्तते –
(1) कठोपनिषदि (2) तैत्तिरीयोपनिषदि
(3) प्रश्नोपनिषदि (4) ईशावास्योपनिषदि
(5) अनुत्तरितः प्रश्नः

17. तैत्तिरीयारण्यकस्य के अध्यायाः 'तैत्तिरीयोपनिषदि' ति कथ्यते ?
(1) सप्तमः अष्टमः नवमश्च ।
(2) षष्ठः सप्तमः अष्टमश्च ।
(3) अष्टमः नवमः दशमश्च ।
(4) चतुर्थः पञ्चमः षष्ठश्च ।
(5) अनुत्तरितः प्रश्नः

18. लगधरचितग्रन्थस्य नाम किम् ?
(1) वेदाङ्ग ज्योतिष् (2) बृहत्संहिता
(3) फलितज्योतिष् (4) ज्योतिषरत्नाकरः
(5) अनुत्तरितः प्रश्नः

19. "अन्धेनैव नीयमाना यथान्धाः" सूक्तिरियं प्राप्यते
(1) ईशावास्योपनिषदि (2) कठोपनिषदि
(3) केनोपनिषदि (4) तैत्तिरीयोपनिषदि
(5) अनुत्तरितः प्रश्नः

20. कल्पसूत्रस्य चतुर्षु भागेषु नास्ति
(1) धर्मसूत्रम् (2) श्रौतिसूत्रम्
(3) गृह्यसूत्रम् (4) शुल्वसूत्रम्
(5) अनुत्तरितः प्रश्नः

21. षड् भावविकारा भवन्तीति मतं कस्य विद्यते ?
(1) शाकटायनस्य (2) औदुम्बरायणस्य
(3) शाकपूणेः (4) वार्ष्यायणेः
(5) अनुत्तरितः प्रश्नः

22. एतेषु 'आचार्यः' इति पदस्य निर्वचनं नास्ति
(1) आचारं ग्राहयति
(2) आचिनोति रसमिति
(3) आचिनोति बुद्धिमिति
(4) आचिनोत्यर्थान्
(5) अनुत्तरितः प्रश्नः

23. समीचीनं निर्वचनं नास्ति –
(1) आदत्ते रसान् – आदित्यः
(2) महाशनो भवति – अश्वः
(3) उदयतीति – उषस्
(4) समभिद्रवन्त्येनम् आपः – समुद्रः
(5) अनुत्तरितः प्रश्नः

24. 'यदक्षरपरिमाणं तच्छन्दः' इति लक्षणं कुत्र प्राप्यते ?
(1) निरुक्ते (2) सर्वानुक्रमण्याम्
(3) पाणिनीयशिक्षायाम् (4) ऋक्प्रातिशाख्ये
(5) अनुत्तरितः प्रश्नः

25. सांख्यकारिकायां व्यक्तप्रकृतेः वैशिष्ट्यानि सन्ति –
(1) हेतुमत्, नित्यं, व्यापी, सक्रियम्
(2) हेतुमत्, अनित्यम्, अव्यापि, सक्रियम्
(3) अहेतुमत्, अनित्यम्, अव्यापि, सक्रियम्
(4) अहेतुमत्, नित्यम्, अव्यापि, निष्क्रियम्
(5) अनुत्तरितः प्रश्नः

26. सत्कार्यवादे हेतुर्नास्ति –
(1) असदकरणाद्
(2) कारणभावात्
(3) शक्तस्य शक्यकरणाद्
(4) सर्वसम्भवभावात्
(5) अनुत्तरितः प्रश्नः

27. सांख्यकारिकानुसारेण सुमेलनमस्ति –

| | | | |
|---|---|---|---|
| क. | महान् अहंकारः पञ्चतन्मात्राश्च | i. | अविकृतिः |
| ख. | पुरुषः | ii. | न प्रकृतिः न विकृतिः |
| ग. | ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकं पञ्चभूतानि मनश्च | iii. | प्रकृतिविकृतयः |
| घ. | मूलप्रकृतिः | iv. | विकृतयः |

| | क | ख | ग | घ |
|---|---|---|---|---|
| (1) | i | ii | iii | iv |
| (2) | ii | iii | i | iv |
| (3) | iv | iii | ii | i |
| (4) | iii | ii | iv | i |

(5) अनुत्तरितः प्रश्नः

28. "न निर्बद्धा उपसर्गा अर्थान् निराहुः" इति कस्य मतमस्ति ?
(1) गार्ग्यस्य (2) वार्ष्यायणेः
(3) शाकटायनस्य (4) शाकपूणेः
(5) अनुत्तरितः प्रश्नः

29. सांख्यमते सात्त्विक एकादशकः प्रवर्तते –
(1) वैकृतादहंकाराद् (2) भूतादेरहंकाराद्
(3) तैजसादहंकाराद् (4) विपर्ययाद्
(5) अनुत्तरितः प्रश्नः

30. साङ्ख्यकारिकामते प्रधानविनिवृत्तौ किम्प्रकारकं कैवल्यं प्राप्यते ?
(1) ऐकान्तिकमात्यन्तिकं च
(2) श्रेयः प्रेयात्मकम्
(3) सुखदुःखात्मकम्
(4) अर्थकामात्मकम्
(5) अनुत्तरितः प्रश्नः

31. सांख्यमते पञ्चभूतानि कस्मात् जायन्ते ?
(1) पञ्चतन्मात्रेभ्यः
(2) पञ्चकर्मेन्द्रियेभ्यः
(3) पञ्चज्ञानेन्द्रियेभ्यः
(4) मनसः
(5) अनुत्तरितः प्रश्नः

32. सांख्यकारिकायां 'व्यक्ताव्यक्तज्ञविज्ञानात्' इति कारिकांशे 'ज्ञः' कोऽस्ति ?
(1) प्रकृतिः (2) मनः
(3) अहंकारः (4) पुरुषः
(5) अनुत्तरितः प्रश्नः

33. सांख्यकारिकानुसारेण अन्धतामिस्रः कतिविधः ?
(1) अष्टविधः (2) नवविधः
(3) द्वादशविधः (4) अष्टादशविधः
(5) अनुत्तरितः प्रश्नः

**34.** अज्ञानमस्ति –

क. सदसद्भ्यामनिर्वचनीयम् ।

ख. त्रिगुणात्मकम् ।

ग. ज्ञानविरोधि ।

घ. अभावरूपम्

(1) केवलम् क (2) क – ख – उभावेव

(3) क ख गाः (4) क ख ग घाः

(5) अनुत्तरितः प्रश्नः

**35.** वेदान्तसारानुसारं सुमेलनं कुरुत –

| | | | |
|---|---|---|---|
| क. | काम्यकर्माणि | i. | संध्यावन्दनादीनि । |
| ख. | नित्यकर्माणि | ii. | पापक्षयसाधनानि चान्द्रायणादीनि । |
| ग. | नैमित्तिककर्माणि | iii. | स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि । |
| घ. | प्रायश्चित्तकर्माणि | iv. | पुत्रजन्माद्यनुबन्धीनि जातेष्ट्यादीनि । |

| | क | ख | ग | घ |
|---|---|---|---|---|
| (1) | ii | iv | i | iii |
| (2) | iii | i | iv | ii |
| (3) | i | ii | iii | iv |
| (4) | iv | ii | iii | i |

(5) अनुत्तरितः प्रश्नः

**36.** "अध्यारोपो" भवति –

(1) वस्तुन्यस्त्वारोपः (2) वस्तुन्यवस्त्वारोपः

(3) वस्तुनि वस्त्वारोपः (4) वस्तुनवस्त्वारोपः

(5) अनुत्तरितः प्रश्नः

**37.** श्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः कथ्यते –

(1) शमः (2) यमः

(3) दमः (4) तपः

(5) अनुत्तरितः प्रश्नः

**38.** सतत्त्वतोऽन्यथाप्रथा उच्यते –

(1) अज्ञानम् (2) अपवादः

(3) विवर्तः (4) विकारः

(5) अनुत्तरितः प्रश्नः

**39.** वेदान्तसारानुसारं सूक्ष्मशरीरस्यावयवेषु न विद्यते –

(1) ज्ञानेन्द्रियपञ्चकम्

(2) कर्मेन्द्रियपञ्चकम्

(3) वायुपञ्चकम्

(4) अहङ्कारः

(5) अनुत्तरितः प्रश्नः

**40.** "पञ्चीकरणम्" इति किमस्ति ?

(1) प्रत्येकं महाभूतस्य पूर्णभागस्य अन्यमहाभूतैः सह मेलनम् ।

(2) प्रत्येकं महाभूतस्य अर्धभागस्य अन्यमहाभूतानाम् अष्टमांशैः सह मेलनम् ।

(3) सर्वेषां महाभूतानां पृथक् – पृथक् सञ्चालनम् ।

(4) सर्वेषां महाभूतानां समं समं मेलनम् ।

(5) अनुत्तरितः प्रश्नः

**41.** तर्कभाषानुसारं त्रिषु शास्त्रप्रवृत्तिषु नास्ति –

(1) उद्देशः (2) लक्षणम्

(3) योग्यता (4) परीक्षा

(5) अनुत्तरितः प्रश्नः

**42.** बुद्धिः ज्ञानेन्द्रियैः सहिता कथ्यते –

(1) आनन्दमयकोशः (2) अन्नमयकोशः

(3) विज्ञानमयकोशः (4) प्राणमयकोशः

(5) अनुत्तरितः प्रश्नः

43. प्रत्यक्षप्रमाणविषये समीचीनं विकल्पं चिनुत –

क. साक्षात्कारि प्रमाकरणम्

ख. सा प्रमा या नेन्द्रियजा ।

ग. तस्याः करणं त्रिविधम् ।

घ. सा प्रमा द्विविधा

(1) क, ख, घ (2) क, ख, ग

(3) क, ख (4) क, ग, घ

(5) अनुत्तरितः प्रश्नः

44. यदा चक्षुषा संयुक्ते भूतले घटाभावो गृह्यते तदा कः इन्द्रियार्थसन्निकर्षो भवति ?

(1) संयोगः

(2) संयुक्तसमवायः

(3) विशेष्यविशेषणभावः

(4) समवायः

(5) अनुत्तरितः प्रश्नः

45. "पृथिवी-लक्षणं गन्धवत्त्वम्" इत्यत्र "गन्धवत्त्वम्" हेतुरस्ति –

(1) केवलान्वयी (2) केवलव्यतिरेकी

(3) अन्वयव्यतिरेकी (4) स्वरूपासिद्धः

(5) अनुत्तरितः प्रश्नः

46. केशवमिश्र-प्रणीत-तर्कभाषानुसारमेषु कार्यत्वमस्ति –

(1) अनन्यथासिद्धनियतापूर्वभावित्वम् ।

(2) अन्यथासिद्धनियतपूर्वभावित्वम् ।

(3) अनन्यथासिद्धनियतपूर्वभावित्वम् ।

(4) अनन्यथासिद्धनियतपश्चाद्भावित्वम् ।

(5) अनुत्तरितः प्रश्नः

47. सव्यभिचारो हेतुरस्ति –

(1) सत्प्रतिपक्षः (2) विरुद्धः

(3) असिद्धः (4) अनैकान्तिकः

(5) अनुत्तरितः प्रश्नः

48. केशवमिश्रानुसारं "पदं च वर्णसमूहः" अत्र 'समूहः इति पदस्याभिप्रायोऽस्ति' –

(1) संघातः (2) समवायः

(3) निकायः (4) एकज्ञान-विषयीभावः

(5) अनुत्तरितः प्रश्नः

49. अर्थसंग्रहानुसारेण 'वेदप्रतिपाद्यः प्रयोजनवदर्थः' उक्तः –

(1) अर्थः (2) मोक्षः

(3) कामः (4) धर्मः

(5) अनुत्तरितः प्रश्नः

50. भवितुर्भवनानुकूलो भावयितुर्व्यापारविशेषः कथ्यते –

(1) विधिः (2) प्रमाणम्

(3) भावना (4) लक्षणा

(5) अनुत्तरितः प्रश्नः

51. शाब्दीभावनायाः साधनाकाङ्क्षायामन्वेति –

(1) आर्थीभावना (2) लिङ्गादिज्ञानम्

(3) अर्थवादः (4) स्वर्गादिफलम्

(5) अनुत्तरितः प्रश्नः

52. न्यायमते 'पक्षः' उच्यते –

(1) निश्चितसाध्यधर्माधर्मी

(2) निश्चितसाध्याभाववान् धर्मी

(3) सन्दिग्धसाध्यधर्मा धर्मी

(4) साहचर्य्य नियमः ।

(5) अनुत्तरितः प्रश्नः

**53.** प्रयोगप्राशुभावबोधको विधिरस्ति –

(1) विनियोगविधिः (2) प्रयोगविधिः

(3) गुणविधिः (4) अपूर्वविधिः

(5) अनुत्तरितः प्रश्नः

**54.** अर्थसंग्रहमते कस्य विधेः सहकारिभूतानि षट् प्रमाणानि ?

(1) अर्थविधेः (2) कर्मविधेः

(3) उत्पत्तिविधेः (4) विनियोगविधेः

(5) अनुत्तरितः प्रश्नः

**55.** कर्मजन्यफलस्वाम्यबोधको विधिः कः ?

(1) प्रयोगविधिः (2) उत्पत्तिविधिः

(3) विनियोगविधिः (4) अधिकारविधिः

(5) अनुत्तरितः प्रश्नः

**56.** अभावप्रत्ययालम्बनावृत्तिरस्ति –

(1) प्रमाणम् (2) विपर्ययः

(3) स्मृतिः (4) निद्रा

(5) अनुत्तरितः प्रश्नः

**57.** 'अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा' इति के सन्ति ?

(1) आसनानि (2) प्रत्याहाराः

(3) यमाः (4) नियमाः

(5) अनुत्तरितः प्रश्नः

**58.** अर्थसंग्रहानुसारेण विधेः कति प्रकाराः सन्ति ?

(1) सप्त (2) त्रयः

(3) चत्वारः (4) पञ्च

(5) अनुत्तरितः प्रश्नः

**59.** ध्यानमेवार्थनिर्भासं स्वरूपशून्यमिव यदा भवति तदोच्यते –

(1) धारणा (2) प्रज्ञालोकः

(3) प्रत्याहारः (4) समाधिः

(5) अनुत्तरितः प्रश्नः

**60.** योगमते सत्त्वपुरुषयोः शुद्धिसाम्ये भवति –

(1) सम्प्रज्ञात-समाधिः

(2) असम्प्रज्ञात-समाधिः

(3) कैवल्यम्

(4) धर्ममेध-समाधिः

(5) अनुत्तरितः प्रश्नः

**61.** योगदर्शने कैवल्यं किम् ?

(1) पुरुषार्थयुक्तानां निर्गुणानां प्रतिप्रसवः

(2) पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः

(3) अपुरुषार्थयुक्तानां निर्गुणानां प्रतिप्रसवः

(4) अपुरुषार्थशून्यानां दोषाणां प्रतिप्रसवः

(5) अनुत्तरितः प्रश्नः

**62.** योगदर्शने चित्तभूमौ न परिगण्यते –

(1) वैराग्यम् (2) क्षिप्तम्

(3) मूढम् (4) निरुद्धम्

(5) अनुत्तरितः प्रश्नः

**63.** योगदर्शनानुसारं निरतिशयं सर्वज्ञबीजमस्ति –

(1) प्रत्ययानुपश्यः (2) सम्प्रज्ञातः

(3) असम्प्रज्ञातः (4) ईश्वरः

(5) अनुत्तरितः प्रश्नः

**64.** जैनदर्शनानुसारं स्याद्वादस्य पर्यायः वर्तते –

(1) एकान्तवादः (2) अनेकान्तवादः

(3) विज्ञानवादः (4) क्षणिकवादः

(5) अनुत्तरितः प्रश्नः

**65.** 'शून्यवाद – सिद्धान्तः' कस्मिन् दर्शने वर्णितः ?

(1) जैनदर्शने (2) बौद्धदर्शने

(3) न्यायदर्शने (4) सांख्यदर्शने

(5) अनुत्तरितः प्रश्नः

**66.** बौद्धमते ज्ञानस्य किं कारणं नास्ति ?

(1) आलम्बनम् (2) समनन्तरम्

(3) सहकारि (4) दैवम्

(5) अनुत्तरितः प्रश्नः

**67.** समुचितं मेलनं कुरुत ।

| | | | |
|---|---|---|---|
| क. | माध्यमिकाः | i. | शून्यं शून्यम् |
| ख. | योगाचाराः | ii. | स्वलक्षणं स्वलक्षणम् |
| ग. | सौत्रान्तिकाः | iii. | दुःखं दुःखम् |
| घ. | वैभाषिकाः | iv. | सर्वं क्षणिकं क्षणिकम् |

| | क | ख | ग | घ |
|---|---|---|---|---|
| (1) | iv | iii | ii | i |
| (2) | iv | i | iii | ii |
| (3) | i | ii | iii | iv |
| (4) | iv | iii | i | ii |

(5) अनुत्तरितः प्रश्नः

**68.** 'सर्वज्ञो जितरागादि दोषस्त्रैलोक्यपूजितः ।
यथास्थितार्थवादी च देवोऽर्हन् परमेश्वरः ।।'
इत्येतद् अर्हल्लक्षणं सर्वदर्शनसंग्रहे कस्याभिमतम् ?

(1) पदमनन्दिनः (2) हेमचन्द्रस्य

(3) उमास्वामिनः (4) चैनसुखदासस्य

(5) अनुत्तरितः प्रश्नः

**69.** चार्वाकदर्शनस्य को विचारो नास्ति ?

(1) कण्टकादिदुःखमेव नरकः ।

(2) देहच्छेदो मोक्षः ।

(3) अङ्गनाद्यालिङ्गनादिजन्यं सुखमेव पुरुषार्थः ।

(4) तज्जपस्तदर्थभावनम् ।

(5) अनुत्तरितः प्रश्नः

**70.** महाभाष्य–पस्पशाह्निके सास्ना–लाङ्गूल–ककुद–खुर–विषाण्यर्थरूपं किमस्ति ?

(1) द्रव्यम् (2) क्रिया

(3) आकृतिः (4) शब्दः

(5) अनुत्तरितः प्रश्नः

**71.** "चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहा त्रीणि निहिता नेङ्गयन्ति" मंत्रस्यास्य चतुर्थ – पादमस्ति –

(1) महो देवो मर्त्यान् आविवेश ।

(2) तुरीयं वाचो मनुष्या वदन्ति ।

(3) भद्रैषां लक्ष्मीर्निहिताधिवाचि ।

(4) सोऽनन्तमाप्नोति जयं परत्र ।

(5) अनुत्तरितः प्रश्नः

**72.** 'सिद्धे शब्दार्थसम्बन्धे' अत्र 'सिद्ध' पदस्यार्थः कः ?

(1) साध्यः (2) नित्यः

(3) गुणः (4) परिणामः

(5) अनुत्तरितः प्रश्नः

**73.** चार्वाकमतेन परमेश्वरः कोऽस्ति ?

(1) अग्निहोत्रनिरतो जनः

(2) लोकसिद्धो राजा

(3) वेदत्रयी प्रवर्तकः

(4) नित्यज्ञानाश्रयः

(5) अनुत्तरितः प्रश्नः

74. "सर्वैः लिङ्गैः सर्वाभिः विभक्तिभिर्मन्त्राः न निगदिताः" इत्यादिना महाभाष्यकारेण कतमं व्याकरणाध्ययनप्रयोजनं निरूपितम् ?

(1) रक्षा (2) आगमः

(3) असन्देहः (4) ऊहः

(5) अनुत्तरितः प्रश्नः

75. 'अव्ययं विभक्ती' त्यादि-सूत्रोक्त – शब्दप्रादुर्भावार्थेऽव्ययीभाव-समासोदाहरणं किम् ?

(1) इतिहरि (2) प्रत्यर्थम्

(3) सहरि (4) अधिहरि

(5) अनुत्तरितः प्रश्नः

76. सामान्यतः अव्ययीभावसमासो भवति –

(1) नपुंसकलिङ्गे (2) स्त्रीलिङ्गे

(3) पुँल्लिङ्गे (4) सर्वलिङ्गे

(5) अनुत्तरितः प्रश्नः

77. "सक्षत्रम्" इत्यत्र कस्मिन्नर्थे समासः भवति ?

(1) सादृश्यार्थे (2) साकल्यार्थे

(3) सम्पत्त्यर्थे (4) अन्तार्थे

(5) अनुत्तरितः प्रश्नः

78. अत्र व्यधिकरणबहुव्रीहेः किमुदाहरणम् ?

(1) सरसिजम् (2) कण्ठेकालः

(3) व्यूढोरस्कः (4) अक्षशौण्डः

(5) अनुत्तरितः प्रश्नः

79. "व्याकरणम्" इत्यस्य शब्दस्य कः पदार्थः ?

(1) आप्तवाक्यम् (2) शब्दाः

(3) लक्ष्यलक्षणे (4) प्रत्ययाः

(5) अनुत्तरितः प्रश्नः

80. असमीचीनं विकल्पं चिनुत ......

(1) द्वन्द्वे घि – हरिहरौ

(2) नदीभिश्च – पञ्चगङ्गम्

(3) अजाद्यदन्तम् – ईशकृष्णौ

(4) नञ् – नैकधा

(5) अनुत्तरितः प्रश्नः

81. 'एध्' धातोः लुट्लकारस्य रूपं नास्ति –

(1) एधिता (2) एधितासाथे

(3) एधितावहे (4) एधिताहे

(5) अनुत्तरितः प्रश्नः

82. एषु कतमं संज्ञासूत्रमस्ति

(1) अनुदात्तङित आत्मनेपदम्

(2) तङानावात्मनेपदम्

(3) स्वरितञितः कर्त्रभिप्राये क्रियाफले

(4) शेषात्कर्तरि परस्मैपदम्

(5) अनुत्तरितः प्रश्नः

83. "तस्थस्थमिपां तान्तन्तामः" इति सूत्रस्य कस्मिन् लकारे प्रवृत्तिः न भवति ?

(1) लङ्लकारे (2) लिङ्लकारे

(3) लोट्लकारे (4) लुट्लकारे

(5) अनुत्तरितः प्रश्नः

84. 'प्रियः' इत्यत्र प्रत्ययोऽस्ति –

(1) अच् (2) कः

(3) क्यप् (4) यत्

(5) अनुत्तरितः प्रश्नः

85. "ईश्वरं गुरुं च भजस्व" इत्यत्र चार्थो वर्तते –

(1) समुच्चयः (2) अन्वाचयः

(3) इतरेतरः (4) समाहारः

(5) अनुत्तरितः प्रश्नः

86. 'चरेष्टः' इति सूत्रेण 'चर्' धातोः 'ट' प्रत्ययो भवति

(1) कर्मणि उपपदे (2) करणे उपपदे

(3) अपादाने उपपदे (4) अधिकरणे उपपदे

(5) अनुत्तरितः प्रश्नः

87. 'दात्रम्' इत्यत्र कस्मिन्नर्थे कः प्रत्ययः भवति ?

(1) करणे 'त्र' प्रत्ययः

(2) कर्मणि ष्ट्रन् प्रत्ययः

(3) भावे क्विप् प्रत्ययः

(4) करणे ष्ट्रन् प्रत्ययः

(5) अनुत्तरितः प्रश्नः

88. 'रज्यति अस्मिन्' इति विग्रहे कृदन्ते घञि किं रूपम् ?

(1) रागः (2) रङ्गः

(3) राजः (4) राज्यम्

(5) अनुत्तरितः प्रश्नः

89. वंश्ये पित्रादौ जीवति सति पौत्रादेर्यदपत्यं चतुर्थादि तस्य संज्ञा भवति –

(1) अपत्यसंज्ञा (2) गोत्रापत्यसंज्ञा

(3) युवसंज्ञा (4) अनन्तरापत्यसंज्ञा

(5) अनुत्तरितः प्रश्नः

90. 'लभ्यम्' इति सिद्धौ कतमं सूत्रं प्रवर्तते ?

(1) पोरदुपधात्

(2) ऋहलोर्ण्यत्

(3) अचो यत्

(4) एति – स्तु – शास् – वृ – दृ – जुषः क्यप्

(5) अनुत्तरितः प्रश्नः

91. 'राजन्' प्रातिपदिकात् जातावेव अपत्यार्थे तद्धितप्रत्ययो भवति –

(1) इञ् प्रत्ययः (2) ढक् प्रत्ययः

(3) अञ् प्रत्ययः (4) यत् प्रत्ययः

(5) अनुत्तरितः प्रश्नः

92. एतेषु मत्वर्थीयस्योदाहरणं वर्तते –

(1) रामः (2) कृष्णः

(3) बालकः (4) राजा

(5) अनुत्तरितः प्रश्नः

93. प्रथमान्तात् केशप्रातिपदिकात् मत्वर्थे रूपं न सिद्ध्यति –

(1) केशवः (2) केशवान्

(3) केशमान् (4) केशिकः

(5) अनुत्तरितः प्रश्नः

94. 'अर्शसः' इत्यत्र कः प्रत्ययः ?

(1) अस् प्रत्ययः (2) अण् प्रत्ययः

(3) श – प्रत्ययः (4) अच् – प्रत्ययः

(5) अनुत्तरितः प्रश्नः

95. 'वासिष्ठः' "श्वाफल्कः" "वासुदेवः" "नाकुलः" इति चतुर्णां प्रयोगाणां क्रमशः वंशाः निर्देष्टव्याः –

(1) "ऋषिवंशः" "वृष्णिवंशः" "अन्धकवंशः" "कुरुवंशः"

(2) "ऋषिवंशः" "कुरुवंशः" "वृष्णिवंशः" "अन्धकवंशः"

(3) "अन्धकवंशः" "ऋषिवंशः" "वृष्णिवंशः" "कुरुवंशः"

(4) "ऋषिवंशः" "अन्धकवंशः" "वृष्णिवंशः" "कुरुवंशः"

(5) अनुत्तरितः प्रश्नः

96. "कृदिकारादक्तिनः" इत्यस्योदाहरणं किम् ?

(1) रात्री (2) शक्तिः
(3) बद्धी (4) मृद्वी
(5) अनुत्तरितः प्रश्नः

97. ङीनुप्रत्ययस्योदाहरणं नास्ति –

(1) ब्राह्मणी (2) शार्ङ्गरवी
(3) वृषली (4) बैदी
(5) अनुत्तरितः प्रश्नः

98. वर्णानामतिशयितः सन्निधिः किं सञ्ज्ञो भवति ?

(1) संयोगसञ्ज्ञः (2) संहितासञ्ज्ञः
(3) पदसञ्ज्ञः (4) सवर्णसञ्ज्ञः
(5) अनुत्तरितः प्रश्नः

99. 'अहो ईशा' इत्यत्र निपातस्य संज्ञा भवति –

(1) सार्वधातुकसंज्ञा (2) आर्धधातुकसंज्ञा
(3) प्रगृह्यसंज्ञा (4) सर्वनामसंज्ञा
(5) अनुत्तरितः प्रश्नः

100. प्राद्युपसर्गाणां क्रियायोगे का संज्ञा ?

(1) निष्ठासंज्ञा (2) गतिसंज्ञा
(3) अपृक्तसंज्ञा (4) उपधासंज्ञा
(5) अनुत्तरितः प्रश्नः

101. 'शि' प्रत्ययस्य संज्ञा भवति –

(1) सार्वधातुकसंज्ञा (2) प्रगृह्यसंज्ञा
(3) सर्वनामसंज्ञा (4) सर्वनामस्थानसंज्ञा
(5) अनुत्तरितः प्रश्नः

102. 'रोहिणी' इत्यत्र कः प्रत्ययः ?

(1) ङीष् प्रत्ययः (2) ङीन्–प्रत्ययः
(3) ङीप्–प्रत्ययः (4) तिः – प्रत्ययः
(5) अनुत्तरितः प्रश्नः

103. अचां मध्ये योऽन्त्यः स आदिर्यस्य तदुच्यते –

(1) विभाषा संज्ञमिति (2) अपृक्त संज्ञमिति
(3) प्रगृह्य संज्ञमिति (4) टिसंज्ञमिति
(5) अनुत्तरितः प्रश्नः

104. निषेधविकल्पयोः संज्ञा भवति –

(1) अंगसंज्ञेति (2) भसंज्ञेति
(3) विभाषासंज्ञेति (4) अपृक्तसंज्ञेति
(5) अनुत्तरितः प्रश्नः

105. धात्वधिकारोक्ताः तिङः शितश्च स्युः

(1) सार्वधातुकसंज्ञाः
(2) आर्धधातुकसंज्ञाः
(3) अंगसंज्ञाः
(4) गतिसंज्ञाः
(5) अनुत्तरितः प्रश्नः

106. द्यूतार्थस्य "दिव्" धातोः कर्मणि कारके विभक्तिः भवति –

(1) पञ्चमीविभक्तिः
(2) प्रथमाविभक्तिः
(3) षष्ठीविभक्तिः
(4) सप्तमीविभक्तिः
(5) अनुत्तरितः प्रश्नः

107. यकारादिषु अजादिषु च कप्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु पूर्वस्य संज्ञा भवति –

(1) आर्धधातुकसंज्ञा (2) पदसंज्ञा
(3) भसंज्ञा (4) अपृक्तसंज्ञा
(5) अनुत्तरितः प्रश्नः

108. 'द्विद्रोणेन धान्यं क्रीणाति' इत्यत्र तृतीया विभक्तिः भवति –

(1) कर्तृकरणयोस्तृतीया

(2) संज्ञोऽन्यतरस्यां कर्मणि

(3) हेतौ

(4) प्रकृत्यादिभ्य उपसंख्यानम्

(5) अनुत्तरितः प्रश्नः

109. 'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः' इत्यत्र 'असूया' पदस्य अर्थः अस्ति –

(1) अक्षमा

(2) अपकारः

(3) गुणेषु दोषाविष्करणम्

(4) अमर्षः

(5) अनुत्तरितः प्रश्नः

110. 'हरिः सेव्यते' इत्यत्र हरिप्रातिपदिके प्रथमाविभक्तिरभवत् –

(1) कृत् प्रत्ययेन कर्मणः उक्तत्वात्

(2) कर्तृकारकत्वात्

(3) तिङ्प्रत्ययेन कर्मणः उक्तत्वात्

(4) निपातनत्वात्

(5) अनुत्तरितः प्रश्नः

111. 'ग्रामं गच्छन् तृणं स्पृशति' अत्र द्वितीया विधायकं सूत्रमस्ति –

(1) कर्मणि द्वितीया

(2) कर्तुरीप्सिततमं कर्म

(3) अकथितं च

(4) तथायुक्तं चानीप्सितम्

(5) अनुत्तरितः प्रश्नः

112. 'कृष्णस्य कृतिः' इति कस्य सूत्रस्योदाहरणं वर्तते ?

(1) षष्ठी शेषे (2) कर्तृकर्मणोः कृति

(3) क्तस्य च वर्तमाने (4) कृत्यानां कर्तरि वा

(5) अनुत्तरितः प्रश्नः

113. 'मम मया वा सेव्यो हरिः' इत्यत्र विकल्पेन षष्ठी विभक्तिः जाता –

(1) 'षष्ठी शेषे' इति सूत्रेण

(2) 'कर्तृकर्मणोः' कृति, इति सूत्रेण

(3) 'उभयप्राप्तौ कर्मणि' इति सूत्रेण

(4) 'कृत्यानां कर्तरि वा' इति सूत्रेण

(5) अनुत्तरितः प्रश्नः

114. भारोपीय 'सतम्' वर्गस्य भाषा अस्ति

(1) ग्रीक-भाषा (2) तुखारी-भाषा

(3) आर्य-भाषा (4) जर्मनिक-भाषा

(5) अनुत्तरितः प्रश्नः

115. अत्र पश्च स्वरोऽस्ति –

(1) आ (2) ई

(3) ए (4) ओ

(5) अनुत्तरितः प्रश्नः

116. दूरान्तिकार्थेभ्यः शब्देभ्यः काः विभक्तयः फलिताः ?

(1) द्वितीया, तृतीया, चतुर्थी, पञ्चमी च

(2) द्वितीया, पञ्चमी, षष्ठी, सप्तमी च

(3) द्वितीया, तृतीया, पञ्चमी, सप्तमी च

(4) तृतीया, पञ्चमी, षष्ठी, सप्तमी च

(5) अनुत्तरितः प्रश्नः

117. आकृतिमूलकवर्गीकरणे सूडानी भाषास्ति –

(1) अश्लिष्टयोगात्मिका

(2) प्रश्लिष्टयोगात्मिका

(3) अयोगात्मिका

(4) आंशिक-श्लिष्टयोगात्मिका

(5) अनुत्तरितः प्रश्नः

118. लौकिकसंस्कृते यदि गन्तुमिति रूपं स्यात्तर्हि वैदिकसंस्कृते गन्तुमित्यत्र रूपं स्यात् –

(1) गमनाय (2) गन्तुमसे

(3) गन्तुध्यै (4) गमध्यै

(5) अनुत्तरितः प्रश्नः

119. भाषायाः आकृतिमूले वर्गीकरणे योगात्मक-श्लिष्ट-बहिर्मुखी-संयोगात्मकभाषा का वर्तते ?

(1) चीनी-भाषा (2) हिब्रू-भाषा

(3) हिन्दी-भाषा (4) संस्कृत-भाषा

(5) अनुत्तरितः प्रश्नः

120. ग्रिमनियमानुसारं भारोपीयमूलभाषाया घोषाल्पप्राण-वर्णाः ग्, द्, ब् इत्येते केषु वर्णेषु परिवर्तन्ते जर्मनिकभाषायाम् ?

(1) क्, द्, ब् इत्येतेषु

(2) क्, त्, प् इत्येतेषु

(3) प्, त्, ब् इत्येतेषु

(4) क्, त्, भ् इत्येतेषु

(5) अनुत्तरितः प्रश्नः

121. वैदिकसंस्कृते कौ समासौ नास्ताम् ?

(1) 'कर्मधारयद्विगु' इति

(2) द्वन्द्वाव्ययीभावाविति

(3) तत्पुरुषाव्ययीभावाविति

(4) द्विगु-अव्ययीभावाविति

(5) अनुत्तरितः प्रश्नः

122. अफ्रीकाखण्डे कः परिवारः गण्यते ?

(1) बांटूपरिवारः

(2) चीनीपरिवारः

(3) द्रविड़परिवारः

(4) काकेशियनपरिवारः

(5) अनुत्तरितः प्रश्नः

123. भाषाया उच्चारणश्रवणपक्षौ सम्बद्धौ स्तः

(1) पदेन (2) बोधेन

(3) वाक् इत्यनेन (4) अर्थेन

(5) अनुत्तरितः प्रश्नः

124. संस्कृतध्वनिनां बाह्यप्रयत्नेषु नास्ति –

(1) संवारः (2) स्पृष्टः

(3) विवारः (4) स्वरितः

(5) अनुत्तरितः प्रश्नः

125. का भाषा "केन्टुम्" वर्गेण असम्बद्धा ?

(1) इलीरियन-भाषा

(2) तोखारी-भाषा

(3) केल्टिक-भाषा

(4) ग्रीक-भाषा

(5) अनुत्तरितः प्रश्नः

126. आपः वातश्च कस्य देवस्य व्रतानुसारं रमन्ते ?
(1) इन्द्रस्य (2) सवितुः
(3) रुद्रस्य (4) सोमस्य
(5) अनुत्तरितः प्रश्नः

127. ऋतस्य देवता अस्ति –
(1) विष्णुः (2) वरुणः
(3) इन्द्रः (4) अग्निः
(5) अनुत्तरितः प्रश्नः

128. मरुतां पिता कः देवः उच्यते ?
(1) सोमः (2) सविता
(3) रुद्रः (4) वरुणः
(5) अनुत्तरितः प्रश्नः

129. 'सहसः पुत्र' इति कस्य देवस्य वैशिष्ट्यम् अस्ति ?
(1) इन्द्रस्य (2) पुरुषस्य
(3) अग्नेः (4) वरुणस्य
(5) अनुत्तरितः प्रश्नः

130. देवानां वैद्यः उच्यते
(1) बृहस्पतिः (2) अश्विनौ
(3) सोमः (4) मरुत्
(5) अनुत्तरितः प्रश्नः

131. वाक् सूक्तस्य देवता का ?
(1) पुरुषः (2) प्रजापतिः
(3) परमात्मा (4) नारायणः
(5) अनुत्तरितः प्रश्नः

132. "सूनरी" इति विशेषणेन का देवता स्तुता ?
(1) पृथिवी (2) अश्विनौ
(3) उषाः (4) सविता
(5) अनुत्तरितः प्रश्नः



133. "आपो ह यद् बृहतीर्विश्वमायन्" इति मन्त्रांशः कुत्र वर्तते ?
(1) पृथिवीसूक्ते (2) वरुणसूक्ते
(3) कालसूक्ते (4) हिरण्यगर्भसूक्ते
(5) अनुत्तरितः प्रश्नः

134. 'यस्मान्न ऋते विजयन्ते जनासो' इति मन्त्रांशस्य ऋषिः –
(1) वागम्भृणी (2) मधुच्छन्दा
(3) गृत्समदः (4) नारायणः
(5) अनुत्तरितः प्रश्नः

135. शिवसङ्कल्पसूक्ते किं छन्दः ?
(1) जगती (2) त्रिष्टुप्
(3) अनुष्टुप् (4) बृहती
(5) अनुत्तरितः प्रश्नः

136. पुरुषसूक्ते इध्मरूपेण कः परिकल्पितः ?
(1) वसन्तः (2) ग्रीष्मः
(3) शरद् (4) घृतम्
(5) अनुत्तरितः प्रश्नः

137. "भगं वर्चः पृथिवी नो दधातु" इत्यत्र 'वर्चः' पदस्य कोऽर्थः ?
(1) तेजः (2) ऐश्वर्यम्
(3) देवाः (4) जनाः
(5) अनुत्तरितः प्रश्नः

138. विराट्पुरुषस्य पद्भ्याम् अजायत –
(1) भूमिः (2) सूर्यः
(3) वायुः (4) इन्द्रः
(5) अनुत्तरितः प्रश्नः

139. "सहस्त्रंधारा द्रविणस्य मे दुहाम्" इत्यत्र कस्याः स्तुतिः ?

(1) उषसः (2) पृथिव्याः
(3) वाग्देवतायाः (4) धेनोः
(5) अनुत्तरितः प्रश्नः

140. "आ त्वा वहन्तु सुयमासो अश्वा" इति मंत्रांशः कस्मिन् सूक्ते समुपलभ्यते ?

(1) वाक्सूक्ते (2) उषस्सूक्ते
(3) वरुणसूक्ते (4) पुरुषसूक्ते
(5) अनुत्तरितः प्रश्नः

141. "विश्ववारा" विशेषणेन विभूषितदेवता वर्तते –

(1) उषाः (2) पृथिवी
(3) वाक् (4) मनस्
(5) अनुत्तरितः प्रश्नः

142. रुद्राय धनुः का आतनोति ?

(1) उषाः (2) वाक्
(3) पृथ्वी (4) शिवा
(5) अनुत्तरितः प्रश्नः

143. कल्पसूत्रविवाहप्रकरणस्य "ध्रुव इव स्थिरा" इति कथनमाश्रित्य कः वेदानां कालनिर्धारणं कृत्वान् ?

(1) मैक्समूलरः
(2) विण्टरनिट्ज़ः
(3) बालगंगाधर तिलकः
(4) याकोबी
(5) अनुत्तरितः प्रश्नः

144. अथर्ववेदस्य 'राष्ट्राभिवर्धनम्' इति सूक्तस्य मन्त्रद्रष्टा अस्ति –

(1) दीर्घतमा (2) गृत्समदः
(3) वामदेवः (4) वसिष्ठः
(5) अनुत्तरितः प्रश्नः

145. ऋग्वेदसंहितायाः विभाजनं कतिधा कृतम् ?

(1) अष्टक – छन्दोभ्यां द्विधा
(2) अनुवाक् – सूक्ताभ्यां द्विधा
(3) अष्टक – मण्डलक्रमाभ्यां द्विधा
(4) अष्टक – बालखिल्याभ्यां द्विधा
(5) अनुत्तरितः प्रश्नः

146. आदित्यसम्प्रदायस्य वेदः कः ?

(1) कृष्णयजुर्वेदः (2) शुक्लयजुर्वेदः
(3) ऋग्वेदः (4) अथर्ववेदः
(5) अनुत्तरितः प्रश्नः

147. मैत्रायणी संहितायां कति काण्डानि सन्ति ?

(1) चत्वारि (2) त्रीणि
(3) पञ्च (4) सप्त
(5) अनुत्तरितः प्रश्नः

148. कृष्णयजुर्वेदस्य संहिता नास्ति –

(1) तैत्तिरीय-संहिता (2) मैत्रायणी-संहिता
(3) कपिष्ठल-संहिता (4) वाजसनेयि-संहिता
(5) अनुत्तरितः प्रश्नः

149. वेदस्य ऋत्विक् सन्दर्भे समीचीनमस्ति –

(1) होता अथर्ववेदस्य (2) उद्गाता ऋग्वेदस्य
(3) अध्वर्युः यजुर्वेदस्य (4) ब्रह्मा सामवेदस्य
(5) अनुत्तरितः प्रश्नः

150. शंकरबालकृष्णदीक्षितमहोदयः वैदिककाल – निर्धारणे किं स्वीकरोति ?

(1) भूगर्भशास्त्रम् (2) बौद्धसाहित्यम्
(3) शिलालेखम् (4) ज्योतिषशास्त्रम्
(5) अनुत्तरितः प्रश्नः

## रफ कार्य के लिए स्थान / SPACE FOR ROUGH WORK